

जून २०१८ (वै. २०७५)
अ० ज्येष्ठ कृष्ण तृतीया तः आषाढ कृष्ण द्वितीया पर्यन्तम्

ISSN: 2347-1565
मूल्यम् : २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-५ अङ्कः-११

सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

## अखिल भारतीय मौलिक संस्कृत लघु नाटक एवं लघु-कथा लेखन-प्रतियोगिता ( वर्ष २०१८-१९ )

दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा अखिल भारतीय स्तर पर संस्कृत विद्वानों एवं विदुषियों से संस्कृत भाषा में मौलिक रूप में लिखित संस्कृत लघु-कथा एवं लघु-नाटक लेखन प्रतियोगिता हेतु प्रविष्टियाँ आमन्त्रित की जाती हैं। जिसमें रु. 3000/-, रु.2500/-, रु.2000/-, रु.1500/-, रू.1200/-, रु.1000/-रु.600/-, रु. 500/- क्रमशः आठ पुरस्कार होंगे। इसके अतिरिक्त रु.400/- के छः प्रोत्साहन पुरस्कार प्रदान किये जायेंगे।

**प्रतिभागी लेखक/लेखिका निम्नलिखित दिशा- निर्देशों को दृष्टि में रखकर ही अपनी रचना भेजें :-**

1-लघु नाटक एवं लघु कथा स्वयं की मौलिक रचना होनी चाहिए, जिससे सम्बन्धित स्वहस्ताक्षरित घोषणा पत्र संलग्न करना आवश्यक है।

2-संस्कृत लघु नाटक एवं लघु कथा कम से कम चार पृष्ठों में ए-4 साइज एवं अधिक से अधिक पांच पृष्ठों में टंकित होनी चाहिए।

3-संस्कृत लघुनाटक एवं लघु कथा का कोई भी अंश अश्लील, अमर्यादित, राष्ट्र विरोधी तथा व्यक्तिगत आक्षेप युक्त नहीं होना चाहिए।

4-संस्कृत लघुनाटक एवं लघुकथा बालोपयोगी तथा शिक्षाप्रद होनी चाहिए।

5-संस्कृत लघुनाटक एवं लघु कथा ई-मेल अथवा डाक द्वारा प्रविष्टियाँ अकादमी कार्यालय में जमा कराने की अन्तिम तिथि 31.10.2018 तक है।

नोट- लेखकों द्वारा मौलिक लघु नाटक एवं लघु कथा लेखन प्रतियोगिता हेतु प्रविष्टियाँ अलग-अलग प्रेषित की जायेगी।

अधिक जानकारी के लिए अकादमी वेबसाईट देखें। **www.sanskritacademy.delhi.gov.in**

**Facebook: - www.facebook.com/delhisanskritacademy**

**Email :- delhisanskritacademy@gmail.com**

**प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.-०११-२३६३५५९२, २३६८१८३५**

**सचिव/सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

ISSN : 2347-1565 मूल्यम् २५₹- रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-५ अङ्कः-११

जून-२०१८ वै. २०७५

(अ० ज्येष्ठकृष्ण तृतीया तः आषाढ कृष्ण द्वितीया पर्यन्तम्)

सम्पादकः

**डॉ० जीतराम भट्ट :**

सचिवः

सहायकसम्पादकः

**प्रद्युम्नचन्द्रः**

**पत्रिका-परामर्शकाः**

डॉ० आशुतोषदयाल माथुरः

डॉ० पंकजा घई

डॉ० पूर्वा भारद्वाजः

डॉ० धनञ्जयमणि त्रिपाठी

- अनुक्रमणिका -

| क्र.सं. | | | पृ.सं. |
|---|---|---|---|
| १. | सम्पादकीयम् | | |
| २. | भगवन् मदीयदेशे.... | -श्री मेवाराम कटारा "पङ्कः" | १ |
| ३. | रत्नावलि : | -डॉ० रामकिशोर मिश्रः | २ |
| ४. | द्वे मित्रे | -मधु बाला कक्कड़ | ४ |
| ५. | आयाहि मेघ! | -परमानन्दशर्मा "प्रमोद" | ६ |
| ६. | कुत्र कुत्र न भवति आत्मीयता | -श्रीमतीसरोज गुलाटी | ७ |
| ७. | संगणकः | -डॉ० आशुतोषदयालमाथुरः | ८ |
| ८. | वानराणां चन्द्रग्रहणम् | -डॉ० नारायणदासः | १० |
| ९. | अन्यायः न सहनीयः न च करणीयः | -डॉ० नारायणशास्त्री काङ्करः | १३ |
| १०. | गणेशस्य मातृभक्तिः | -श्रीमन्तचटर्जी | १४ |
| ११. | आत्मानं धूर्ततो रक्षेत् | -डॉ० नारायणशास्त्री काङ्करः | १५ |
| १२. | यंत्रचक्रिका | -डॉ० आशुतोषदयालमाथुरः | १६ |
| १३. | पक्षिणः रक्षणीयाः अस्माभिः सदा | -श्रीमती सरोज गुलाटी | १९ |

**दिल्ली संस्कृत अकादमी**

**(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)**

**DELHI SANSKRIT ACADEMY**

**(GOVT. OF N.C.T., DELHI)**

**प्रकाशकः**

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२,२३६३७७९८

ISSN : 2347-1565

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

## सदस्यताशुल्कम्

| | | | |
|---|---|---|---|
| © | प्रति-अङ्कम् | : | 25 रूप्यकाणि, $2.5 |
| © | वार्षिकम् | : | 250 रूप्यकाणि, $25.00 |

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन
(**दिल्लीसंस्कृतअकादमीपक्षे**)

Mode of payment:

Demand Draft, Money order or by CTC Cheque

( In favour of "Delhi Sanskrit Academy")

E-mail Id : delhisanskritacademy@gmail.com

Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

संस्कृतभाषा समृद्धा प्राचीना वैज्ञानिकी च वर्तते। सर्वे स्वीकुर्वन्ति यद् यादृशी वर्णमाला: यादृक्साहित्यञ्च संस्कृतेऽस्ति तादृशी वर्णमाला तादृक्साहित्यञ्चान्यासु भाषासु नोपलभ्यते। सत्यपि सर्वं सत्यं किन्तु नास्ति संस्कृताध्येतॄणां छात्राणां तादृशः मानः महाविद्यालयेषु विश्वविद्यालयेषु वा यादृशः मानः विज्ञानांग्लप्रभृतीनां विषयाणामध्येतॄणां छात्राणां विद्यते। प्रवेशायापि यादृशः सम्मर्दः विज्ञानांग्लप्रभृतीनां विषयाणां कृते भवति तादृशः सम्मर्दः संस्कृतस्य कृते न भवति। स्थितिरेषा संस्कृताध्येतृछात्राणां मनःसु हीनभावनां जनयति संस्कृतसमाराधकाञ्चावसादयति। किन्त्वस्मिन् सन्दर्भे संस्कृते तत्साहित्ये च नास्ति कोऽपि दोषः। भारतस्य पराधीनतावशाज्जनानामेतादृशः भावः। स्थितिरेषा परिस्थितिजन्या शनैरेव समाप्ता भविष्यति। संस्कृतच्छात्राः विद्वांसः स्वात्मबलेनेच्छाशक्त्या च संस्कृताभिमानिनः भवितुं समर्थाः भविष्यन्ति।

**सुमनसां प्रतिभाप्रतिभासिका**
**क्षितितलात्तमसश्च विनाशिका।**
**शिशुकिशोरयुवप्रियसाधिका**
**विजयते भुवि संस्कृत-चन्द्रिका॥**

**निवेदकः**
**डॉ. जीतरामभट्टः**
**सचिवः**

# भगवन् मदीयदेशे....

- मेवाराम कटारा "पङ्कः"

भगवन् मदीयदेशे, वीराः जना भवन्तु।
राष्ट्र-प्रियाश्च सर्वे बलिदानिनो भवन्तु।।

सर्वे भवन्तु सुखिनः, नीरोगिणश्च सन्तु।
मेधाविनश्च सर्वे, गुणशालिनो भवन्तु।। भगवन्.....।।1।।

धीरा भवन्तु राष्ट्रे च सैनिकाः सुयोधाः।
बलवन्त एव सर्वे, परित्यागिनो भवन्तु।। भगवन्....।।2।।

विद्वज्जना अभीता देशे भवन्तु सर्वे।
गुणग्राहिणो युवानः, मृदुभाषिणो भवन्तु।। भगवन्.....।।3।।

न हि स्याद्धि जातिभेदः न हि भवेच्च वर्गभेदः ।
बन्धुत्व-पाश-बद्धाः, अधिवासिनो भवन्तु।।भगवन्.....।।4।।

न कोऽपि देश-द्रोही, न वंचको भवेदिह।
नासत्यवादिनश्च, कटुभाषिणो भवन्तु।। भगवन्.....।।5।।

कार्येषु भवतु निष्ठा, निरताः भवन्तु सर्वे।
कल्याण-परा हि सर्वे, अधिकारिणो भवन्तु।। भगवन्....।।6।।।

भेदान् सदा विहाय, औदार्यभावपूर्णाः।
सर्वे जनाः मिलित्वा, संरक्षिणो भवन्तु।। भगवन्.....।। 7 ।।

शूराश्च सन्तु पुरुषाः, दुर्गाः भवन्तु नार्यः।
शत्रून् सदा विजेतुं, व्रतधारिणो भवन्तु।। भगवन्.....।।8।।

-३६, जसवन्त नगरम्
भरतपुरम्-३२१००१

# रत्नावलिः

-डॉ० रामकिशोर मिश्रः

रत्नावलिर्बदरिकानिवासिदीनबन्धुपाठकस्य सुताऽऽसीत्। साऽऽसीद् बहुसुन्दरी, यस्या विवाहः सोरोंशूकरक्षेत्रवासितुलसीदासेनाऽभवत्। तुलसीदासो रत्नावल्यां बहुस्नेहं करोति स्म। एकदा रत्नावलिं तस्या भ्राता बदरिकां निनाय। पत्न्यभावे तुलसीदासः स्वगृहे स्थातुं न शशाक। सायं स बदरिकां गन्तुं गङ्गातटं प्राप। तत्र नौकां न दृष्टवा प्रवहन्तं शवं नौकां विज्ञाय तत्रोपविश्य पारं गत्वा बदरिकां प्राप्तवान्। रात्रौ तस्य श्वशुरालयस्य द्वारं कपाटावृतमासीत्। तत्र भित्तौ लम्बितं सर्पं रज्जुं मत्वा तस्याऽऽश्रयेणाऽट्टालिकां गत्वा पत्नीपार्श्वं प्राप्तवान्। शयितां पत्नीं जागरयित्वा स उवाच-त्वं मे प्राणाः, त्वां विना जीवनं व्यर्थम्। तद्वचनं श्रुत्वा रत्नावलिरुवाच-त्वमत्र कथमागतः?

**तुलसीदासः**- प्रिये! भित्तौ रज्जुर्लम्बिताऽऽसीत्तदाश्रेयेणाऽत्राऽऽगमम्।

**रत्नावलिः**- मया रज्जुर्न लम्बिता। तत्र चल्यतां प्रियतम! यत्र त्वया रज्जुर्लम्बिता दृष्टा।

**तुलसीदासः**- प्रियतमे! तव प्रेमबलेन सर्पं रज्जुमपश्यम्। आगच्छ प्रिये! प्रेमरसं पायय।

**रत्नावलिः**- त्वं मे प्रेमाऽन्धोऽसि। यदि त्वं भगवत्प्रेमात्प्रेमान्धो भवेस्तन्मोक्षस्ते भवेत्। मम शरीरे किमस्ति? यदत्र प्रेम करोषि। भगवत्प्रेम कुरु, येन तव कल्याणं स्यात्। गच्छ, रामं भज।

**तुलसीदासः**- न गमिष्यामि प्रिये! त्वां विहाय। त्वं मया सह गृहं चल। त्वां विना जीवितुं न शक्नोमि ।

**रत्नावलिः**- प्रियतम! कथं रात्रौ त्वया सह गच्छानि? एवं गच्छ, त्वां धिक्। यदि त्वमितो न यासि, तत्प्रातस्त्वां विलोक्य मे माता पिता भ्राता च सर्वे त्वां कामुकं कथयिष्यन्ति।

आवयोर्निन्दा भविष्यति। अतस्त्वमितो गच्छ। भगवति प्रेम कुरु, येन त्वं मोक्षं प्राप्स्यसि। गच्छ प्रियतम! भगवन्तं रामं भज , येन तव कल्याणं भवेत्।

**तुलसीदासः**:- गच्छामि प्रिये! अधुना भगवन्तं रामं भजिष्यामि। त्वयाऽहं धिक्कृतोऽस्मि। पत्न्या प्रेमरहितवाचा ताडितस्तुलसीदासो बदरिकातः सोरोंशूकरक्षेत्रमागत्य गृहं न गत्वा वने वने भगवन्तं रामं भजन्नितस्ततो भ्रमितुमारेभे। साधुवेषं गृहीत्वा तीर्थाटने प्रयागं काशीं च जगाम। तत्र स तां रामकथां श्रावितवान्, यां कथां स सोरोंशूकरक्षेत्रे स्वगुरुनरहरिमुखाच्छुश्राव।

ततः सोऽयोध्यां जगाम। तत्र स कवित्वशक्तिं प्राप्तवान्। 1631 वैक्रमाब्दे चैत्रमासे रामनवमीदिने प्रातः स रामचरितमानसं लिखितुमारेभे। वर्षद्वये सप्तमासेषु षड्विंशतिदिनेषु 1633 विक्रमसंवत्सरे स रचनामपूरयत्। तस्य पत्नी रत्नावलिस्तं कविं विधातुं प्रेरिकाऽऽसीत्, या पतिविरहे स्वजीवनं यापितवती।

**-२९५/१४ पट्टीरामपुरम्**
**खेकड़ा ( बागपत )**
**उत्तर प्रदेशः**

# द्वे मित्रे

**–मधु बाला कक्कडः**

द्वे मित्रे आस्ताम् गगनः अमनश्च। तौ पंचमी–कक्षायां पठतः स्म। एकस्मिन् दिने तौ क्रीडाकालांशे जलकूपीं ग्रहीतुं कक्षां आगतवन्तौ । तस्मिन् समये अन्यबालकाः क्रीडाक्षेत्रे क्रीडनम् कुर्वन्तिस्म। तौ स्वसहपाठिनः विपिनस्य उत्पीठिकायां द्वे कलमे अपश्यताम्। तौ लालायितौ भूत्वा एकैकं कलमं स्व स्वपार्श्वे अस्थापयताम्। गृहं गत्वा गगनः स्वमातरं कलमं दर्शयित्वा अकथयत् यत् सः 'कथावाचने' पुरस्कारं प्राप्तवान्, एवमेव अमनोऽपि स्वमातरं मिथ्या अवदत्। तयोः मातरौ तौ सत्यं वदितुम् अकथयताम्।

गगनस्य माता प्रवीणा आसीत् । सा तस्य मनोभावं ज्ञातुं अकथयत्– 'पुत्र! अहमेव तादृशीं शोभनां कथां श्रोतुमिच्छामि।' मातुर्वचनं श्रुत्वा भयभीत गगनः मातरं सर्वं सत्यं अवदत् –'इदं कलमं तु विपिनस्य अस्ति।' माता पुत्रस्य पार्श्वे स्थित्वा स्नेहेन तं अशिक्षयत्–"पुत्र! चौरकार्यं एवं मिथ्या वार्ता उचित नास्ति। त्वया ईदृशं कार्यं कदापि न कर्तव्यम्। श्रेष्ठं कार्यं कृत्वा एव मनुष्यः जीवने साफल्यं प्राप्नोति। अतएव सदैव श्रेष्ठं कर्म कर्तव्यम्।"

मातुः प्रभावशालि वचनं श्रुत्वा मनसि विचार्य गगनः अपरदिवसे विपिनस्य कलमं प्रत्यावर्तत् । किन्तु अमनेन एवं न कृतम्। अमनः अवसरं प्राप्य यदा कदा चौरकार्यं करोति स्म। पठने तस्य मनः न लगति स्म। शनैः शनैः तयोः मित्रता अपि समाप्तप्रायः अभवत्।

गगनः परिश्रमी, कीडायां प्रवीणः व्यवहारकुशलः, पठने निपुणः च आसीत्। अनेन कारणेन तस्य मित्रता अपि शोभनैः बालकैः सह अभवत्। क्रमेण अग्रिमकक्षाः समुत्तीर्य तेन स्नातकपरीक्षायाः उपाधिः प्राप्तः। तत्पश्चात् प्रशासनिकपरीक्षां उत्तीर्य सः 'भारतीय–पोलीस–सेवायां' अधिकारी सञ्जातः।

अमनस्य मित्रता तु अनर्गलवार्तालाप-मिथ्याभाषण-चौरकर्मसंलग्नैः बालकैः सह अभवत्। येन केन प्रकारेण सः दशमीकक्षायां उत्तीर्णः अभवत्। तत्पश्चात् पठनकार्यं परित्यज्य सः चौर्य-तस्कर-कार्येषु प्रवृत्तः अभवत् । अनेकवारं अपराधान् कृत्वा सः कारागृहम् अगच्छत्। कारागृहात् बहिरागत्य सः पुनः पुनः तानि कार्याणि करोति स्म।

किञ्चिद्दिनानन्तरं गगनेनैव अमनस्य संगठनः गृहीतः। अमनः तस्य सहयोगिनः च दीर्घतरं दण्डं अवाप्तवन्तः। गगनः अमनम् अकथयत् - ''यथा त्वया कार्यं कृतं तथैव दण्डः प्राप्तः।'' आत्मग्लानिना पश्चात्तापेन च ग्रसितः अमनः आत्मानं सापराधं मत्वा अरुदत्। रोदनं कृत्वा स अवदत् - ''यदि बाल्यकाले एव मातुर्वचनमनुसृत्य सत्यं वदेत् तर्हि अधुना शोभनः मनुष्यः भवितुमर्हति।'' गगनः तम् अकथयत् -सदैव सत्यं कथनीयं ,शोभनं कार्यं करणीयम् च। उक्तं च -

**''महाजनो येनगताः स पन्थाः।''**

**- ए-७२, फ्रेंडसटॉवर,**
**भूखण्ड संख्या-४७ सैक्टर-९,**
**रोहिणी, नव देहली-८५**

# आयाहि मेघ!

- परमानन्दशर्मा ''प्रमोदः''

आयाहि मेघ रे ! वर्षय नीरं, मधुरं मधुरं मधुरम्।
ज्वलति धरेयं दहति शरीरं, अचिरम् अचिरम् अचिरम्।।
स्वागताय ते दर्दुरयूथः टर्र् टर्र् गायति गानम्।
वर्हि नृत्यति केकातालैः त्यक्त्वा ज्ञानं ध्यानं।।
कल-कल कुर्वत् प्रवहति नीरं, रुचिरं रुचिरं रुचिरम्।
आयाहि मेघ रे ! वर्षय नीरं, मधुरं मधुरं मधुरम्।।
नीलाम्बरतः वर्षति नीरं, हृष्यन्ति च कृषका मीनाः।
मुग्धा बालगोपालाः सर्वे, नृत्ये गाने लीनाः।।
पश्य, कोकिलं तर्जति भेकः, चतुरं चतुरं चतुरम्।
आयाहि मेघ रे ! वर्षय नीरं, मधुरं मधुरं मधुरम्।।
जलं जीवनं जले च प्राणाः, जलं ब्रह्मणः धारा।
जलं सभ्यता जलं संस्कृतिः, न जलं विना परिवाराः।।
तन्मिलति तव कृपया बलाहक! प्रचुरं प्रचुरं प्रचुरम्।
आयाहि मेघ रे ! वर्षय नीरं, मधुरं मधुरं मधुरम्।।

- श्रीमथुराधीशमन्दिरम्
चमनाबावडी, शाहपुरा,
जिला - भीलवाडा
राजस्थानम्

# कुत्र कुत्र न भवति आत्मीयता

**- सरोज गुलाटी**

**भार**तदेशः आत्मीयतायै सम्पूर्णधरातले प्रसिद्धः वर्तते। एषा धारणा मम मनसि अपि अङ्किता अस्ति। यत्

**" आत्मवत् सर्वभूतेषु '**

मया सर्वदा एवं चिन्त्यते यादृशी **आत्मीयता अत्र वर्तते न** तादृशी कुत्रचित्? परं मम एषा धारणा तदा निरस्ता जाता यदा अहम् एकदा अमेरिकादेशं गतवती। तत्र मया यत् दृष्टम् अनुभूतम् च तत् वर्णयितुं मम वाक् पूर्णतया असमर्था एव। तत्र मया यत् **आत्मीयतायाः** रूपं दृष्टम् तत् अहम् वर्णयामि।

अहं अमेरिकादेशस्य मियामिनगरस्य विमानपत्तने विमानयाने प्रवेशाय प्रतीक्षार्थं बहिः स्थिता। अस्माकं परिवारस्य सर्वे सदस्याः अपि तत्र एव स्थिताः। अन्ये अपि बहवः जनाः विमाने प्रवेशार्थं प्रतीक्षायां रताः आसन्। सहसा अस्माभिः एकः उच्चैः ध्वनिः श्रुतः। एकेन जनेन किम् उद्घोषितम् - अद्य मम कन्यायाः जन्मदिवसः अस्ति। यदा तेन एतत् उद्घोषितम् तत् यत् दृश्यं मया दृष्टं तत् दृष्ट्वा अहं स्तम्भिता। सर्वे जनाः उत्थाय उच्चैः करतलध्वनिम् अकुर्वन्। तस्मै जनाय च शुभवचनानि अवदन्। अस्माकं परिवारः अपि उत्थाय करतलध्वनिम् अकरोत् एवं तस्मै जनाय च शुभवचनानि अब्रवीत्। एतत् दृश्यं दृष्ट्वा तु अहं न केवलं आश्चर्यचकिता जाता अपितु मम अङ्गानि अपि रोमाञ्चितानि सञ्जातानि। तदा मम मनसि अनेके विचाराः उत्पन्नाः अभवन् यत् आत्मीयतायाः तु सर्वत्र एव साम्राज्यम् अस्ति। सर्वेषु जनेषु प्रेम सहृदयता च वर्तते। संकीर्णता तु केवलं मनसि एव जायते ।

**- कुलाची हंसराज माडल विद्यालयः**

**नवदेहली- १००५२**

# संगणकः

- डॉ० आशुतोष दयाल माथुरः

''प्रज्ञे, पिधेहि संगणकम्। एकवादनं संजातम्। प्रातरुत्थाय विद्यालयं कथं गमिष्यसि? ''- इति मातुर्वचनं संश्रुत्यापि प्रज्ञा संगणके चलच्चित्रं पश्यति। माता तदाक्रुश्य वदति - धृष्टे ! न सद्वचनमनुसरसि। संगणकं तव ग्रहीष्यामि''

प्रज्ञा वदति - ''अम्ब! अर्धहोरा-मात्रमवशिष्टं चित्रम्। अहं यथाकालं विद्यालयं प्राप्स्यामि।''

खिन्ना तस्या माता स्वकक्षं याति। पर्यङ्के शयानापि सा निद्रां न लभते। कन्याया व्यवहारं चिन्तयति - हा धिक्! नेयं कालेन स्वपिति, न जागर्ति, न स्नाति न च भुङ्क्ते। यावत्कालं गृहे वर्तते तावत्कालं संगणके यत्तदन्विष्यति, चलचित्राणि पश्यति। पृष्टा सती वदति - अध्ययनार्थमेतत् करणीयम् । तव विद्यार्जनकाले संगणका नैवासन्। अतो न जानासि संगणकानां महत्त्वम्। किं वाऽऽहं कर्तुं शक्नोमि।'' एवं पुनरुत्थाय द्विवादने प्रज्ञायाः कक्षं गच्छति। सा तदापि चलचित्रं पश्यति स्म।

क्रुद्धा तस्या माता सहसा कक्षं प्रविश्य प्रज्ञायाः संगणकं तस्या हस्ताद् गृह्णाति। प्रज्ञा वदति - ''मॉम, व्हॉट इज़ दिस? ''उत्तर न ददाति माता यतस्सा जानाति स्म यदुत्तरप्रदानेन विवादो वर्धते। अतस्तस्या माता संगणकं गृहीत्वा स्वकक्षं प्रत्यावर्तते। प्रज्ञा बहुक्रोधं नाटयन्ती उच्चैःशब्देन द्वारं पिधाय, विद्युद्दीपं निर्वाप्य पर्यङ्क आत्मानं पातयति। अतीव श्रान्ताऽऽविलम्बं निद्रां लभते।

प्रातः सार्धषड्वादने प्रज्ञायाः बसयानं समायाति। माता पंचवादन उत्थाय प्रातराशं मध्याह्नभोजनं च तस्यै करोति। प्रज्ञा घटिकारवं श्रुत्वापि नोत्तिष्ठति। वारं वारं पाकशालात आगत्य-आगत्य माता तां जागरयति।

''सद्य एवोत्तिष्ठामि'' - इति वदन्ती सा पुनः पुनः स्वपिति। षड्वादने निद्रां त्यजति नालस्यम्। शनैः शनैः मुखं प्रक्षाल्य, प्रातराशं हस्ते धृत्वा खादन्ती बसस्थानं प्रति धावति। सैवास्या दिनचर्या।

माता कार्यालयं गमनात् प्राक् प्रज्ञाया: संगणकं तस्या: कक्षे पुन: स्थापयति। प्रज्ञा च विद्यालयादागत्य पुन: संगणके यत्किंचिदन्विष्यति, विद्यालयस्य कार्यं नूनं करोति परं फेसबुक – गूगलाद्यवलोकनमधिकं करोति।

पुन: रात्रौ चलचित्रमवलोकनीयमेव। माता प्रत्यहं वारयति, प्रज्ञा नशृणोति। ततो भर्त्सनं तर्जनं विवाद: यथावत्प्रवर्तते।

माता प्रायस्तां सस्नेहमुपदिशति – बाले, जानामि। सम्प्रति विद्यार्जनाय संगणकमनिवार्यम्। ततोऽहं न वारयामि। परं रात्रौ दीर्घं संगणके कार्यं कुर्याश्चक्षुषी ते विकले भवेताम्।

''अम्ब ! मनोरंजनमपि आवश्यकम्।'' प्रज्ञा प्रतिवदति।

अहो वितण्डाप्रिया मे कन्येति वादं परिहरति माता।

शनिवासरे रात्रौ द्विवादनं यावत् प्रज्ञा संगणके व्यापृताऽऽसीत्। श्वो रविवासर:। अवकाशोऽऽतीति माता तां न निषेधति।

पर्यङ्के स्थिता संगणके चलचित्रं पश्यन्ती प्रज्ञा कदा निद्रामलभतेति सापि न ज्ञातवती। प्रातरुत्थाय पश्यति यत्संगणक: पर्यङ्कात्पतितो द्विधा भग्नश्च।

''अम्बे,'' सा चीत्करोति। तन्निशम्य माता तस्या: कक्षं त्वरितमभिधावति। सर्वमवलोक्य पुत्रीं सान्त्वयति। मातु: क्रोडे निलीना बहुकालं सा रुदितवती।

मात्र! सस्नेहं समाश्वासिता प्रज्ञा पुनर्ब्रूते – नूतनं संगणकं न प्रदास्यसि ? सत्यं वच्मि सम्यक्प्रयोगं करिष्यामि।

**– संस्कृत विभागाध्यक्ष:**
**सेन्ट स्टीफन्स महाविद्यालय:**

# वानराणां चन्द्रग्रहणम्

-डॉ० नारायणदासः

साइँ साइँ गर्जति निशा
चतुर्दिक्षु प्रसृतास्ति शारदीया ज्योत्स्ना
नगरोपान्ते अवशिष्टे एकस्मिन् एव वटवृक्षे
सुप्ताः सन्ति नगरस्य अखिलाः वानराः।
आदिनं कूर्दनं कृत्वा
इतस्ततः धावनं कृत्वा
क्लान्ताः पुनः क्लान्ताः,
सुप्ताः सन्ति गभीरनिद्रया
श्रान्ताः पुनः श्रान्ताः।
आसीत् तत्र चपलः।
कस्यचन वानरस्य बालः,
अधोमुखतया शयानः,
स्वप्नं पश्यति गहनम्
मध्ये मध्ये स्वप्ने प्रलपति।
तस्य प्रलापेन अपरः चपलः
उत्थाय पश्यति-अतिशयधवलः
चन्द्रः पतितः अस्ति,
पुष्करिण्यां सुगभीरजले।
क्षरन्ति चन्द्रिकाः ततः
धवलीकुर्वन्ति रजतीकुर्वन्ति वा सर्वमपि जलम्

सर्वमपि जलं तरलं रौप्यं जातम्
तर्हि पुनः किं पानीयं नागरिकैः?
किमपि करणीयं निश्चयेन,
परन्तु किं करणीयं लघुना वानरेण मया ?
अरे पप्पु, अये मिल्लि, अरे जग्गु
उतिष्ठोत्तिष्ठ बन्धो ! किमपि करणीयम्
जलं रक्षणीयम्, देशः रक्षणीयः अस्माभिरव।
सहसा उत्थाय सर्वे पश्यन्ति
जले निमज्जन् चन्द्रः दोलायते लहरीभिः सह
क्रमशः गभीरात् गभीरं गच्छन् अस्ति।
सर्वे सम्मिल्य योजनां कृतवन्तः,
कश्चन युववानरः नेतृत्वमवहत्,
स वृक्षशाखां सदृढं धृत्वा उदघोषयत्-
मम पुच्छं धृत्वा एकैकशः धीरमवतर,
चन्द्रग्रहणाय।
सहसा पालितः आदेशः,
खप् खप् कृत्वा पुच्छं धृत्वा
अवतीर्णाः एकैकशः।
उपर्युपरि प्रसृताः शाखाः
अधोऽधः अवतीर्णाः वानराः,
एकः , द्वौ, त्रयः, चत्वारः, पञ्च
षट्, सप्त, अष्टौ, नव, दश।
आम्, अधुना चन्द्रः बहुदूरे नास्ति

वानरपुच्छं स्पृशति जलम्।
तदा मडमडायमाना वृक्षशाखा
वानराणां भारेण सहसा त्रुटिता
शीतले जले पतितानां वानाराणाम्
निद्रा भग्ना जाता।
तदा तु चन्द्रः दूरे गगने विहसति स्म।

**- संस्कृतविभागाध्यक्षः,**
**रामकृष्णमिशनावासीयस्वयंशासित महाविद्यालयः,**
**नरेन्द्रपुरम्, कलकत्ता-१०३**

# अन्यायः न सहनीयः न च करणीयः एव

-डॉ० नारायणशास्त्री काङ्करः

श्रूयते, लोकमान्य-बालगङ्गाधर-तिलके अध्ययन-कालात् एव अन्यायं सोढुं शक्तिः न आसीत्। सः न अन्यायं सहते स्म न च अन्यायं करोति स्म। एकवारं शिक्षकः कक्षां प्रविश्य एव यदा इतस्ततः भक्षित- मुद्गफलीनाम् आवरणानि अपश्यत्, तदा " केन इदं दुराचरितम्" इति पुनः पुनः पृष्ट्वा अपि कुतश्चित् शिक्षार्थिनः उत्तरं न प्राप्तवान्, तदा दण्डबलेन उत्तरं प्राप्तुम् इच्छया सः प्रत्येकं शिक्षार्थिनं स्व-हस्तौ प्रसारयितुम् आदिश्य हस्तयोः वेत्रेण आघातं कर्त्तुं प्रवृत्तः। बालगङ्गाधरम् अपि हस्तौ प्रसारयिधतुं शिक्षकः सतर्जनम् आदिष्टवान्। किन्तु सः हस्तौ न प्रसार्य उदतरत्- " अहं मुद्गफलीः न अखादं, तर्हि वेत्रघातं किं सहेय?" "तर्हि यः भक्षितवान्, तस्य एव नाम कथय" एवं पृष्टस्य अपि तिलकस्य उत्तरम् आसीत्- "अहम् इदम् अपि न करिष्यामि।" अन्ते अनेन अपराधेन एव सः शालातः बहिष्कृतः अपि अभूत् इति।

- शिक्षा-

**अन्यायः सहनीयो न, कार्यश्चापि कदापि न।**
**योऽन्यायं सहते तूष्णीं, भीरुः सोऽस्ति नपुंसकः॥**

- विद्या-वैभव-भवनम्
२९-केसर-विहारः
जगतपुरा, जयपुरम्-३०२०१७

# गणेशस्य मातृभक्तिः

- श्रीमन्तचटर्जी

कैलासवास्तव्यायाः भगवत्याः कार्तिकेय-गणेशनामधेयौ द्वौ पुत्रो। एकदा तस्याः गले मौक्तिकहारमेक दृष्ट्वा तयोः मध्ये महान् विवादः सञ्जातः। गणेशः वदति मह्यं देहि, कार्तिकेयोऽपि कथयति देहि मे ते हारम्। कस्मै दातव्यमिति निर्धारयितुम् असमर्था सती माता तु महत्यां विपदि पतिता। अन्तिमे भगवती उक्तवती यत् तयोः द्वयोः मध्ये यः समग्रं विश्वं भ्रमित्वा अग्रे प्रत्यागन्तुं समर्थः भविष्यति, तस्मै हारम् इमम् उपायनरूपेण समर्पयामि। मातुः कथां श्रुत्वा कार्तिकेयस्य महान् आनन्दः। सपदि वाहनं मयूरम् आरुह्य स विश्वब्रह्माण्डं प्रदक्षिणीकर्तुम् आरभते। मातुः हारं स एव प्राप्स्यतीति तस्य द्रढीयान् विश्वासः। यतो मूषिकवाहनवतः स्थूलकायस्य गणेशस्य कृत्स्नं जगत् प्रदक्षिणीकृत्य तस्यापेक्षया अग्रे प्रत्यावर्तनम् असम्भमेव। अपरतः गणेशः शनैः शनैः मातरं प्रदक्षिणीकृत्य पुनः प्रत्यावर्तितवान्। मातुः चरणयुगलं प्रणम्य स उक्तवान्--मातः, त्वं हि महामाया, त्वयैव सृष्टं जगत् । त्वाम् अन्तरा समग्रं विश्वं राजते। त्वां परितः प्रदक्षिणीकृत्य विश्वं प्रदक्षिणीकृतं मया।

बहुक्षणात् परं कार्तिकेयः प्रत्यागतवान् गणेशस्य पराजयेन स एव हारं स्वीकरिष्यतीति तस्य प्रत्ययः। मौनं स्थितवन्तं गणेशं दृष्ट्वा परिहासेन कार्तिकेय उक्तवान् किं भोः अग्रज, भवता विश्वब्रह्माण्डस्य प्रदक्षिणं समाप्तं खलु? गणेशः मृदुस्वरेण कथयति आम्, जातम्। एतत् श्रुत्वा साश्चर्य कार्तिकेयः पुन पृच्छति-- तत्कीदृशम्? तदा गणेशेन प्रोक्तम् अग्रज, वि श्वब्रह्माण्डम् इत्युक्ते सर्वं मम मातरि सन्निहितम् अस्ति। त्वां विहाय अन्यत्किमपि नास्ति। तस्मात् मातुः समन्तात् प्रदक्षिणेन सर्वं प्रदक्षिणीभूतम्।

गणेशस्य एतादृशं ज्ञानं मातृभक्तिञ्च दृष्ट्वा भगवती नितरां तुतोष। स्वकीयात् कण्ठदेशात् हारम् उन्मोच्य गणेशस्य गले परिधापय तस्मै आशिषं दत्तवान्। स्वीयं भ्रमं बुध्यमानः कार्तिकेयः विषण्णमनसा स्थितवान् इति शिवम्।

-ग्राम एवं पो. ओ. वेलाडः
पूर्व वर्धमानम्
पश्चिम बंगालः-७१३४२७

# आत्मानं धूर्त्ततो रक्षेत्

-डॉ० नारायणशास्त्री काङ्कर:

मित्राणाम् आग्रहेण श्रेष्ठी शिवराज: रविवारे रात्रौ एकां सङ्गीत-गोष्ठीम् आयोजितवान्। नगरस्य सुप्रसिद्ध: गायक: आहूत:। तस्य मधुरेण सङ्गीतेन विद्यमाना: पारिवारिका: सदस्या: सुहृद: च अतीव आनन्दानुभूतिं कृतवन्त:। गायकाय पुरस्कार-रूपे यत् किञ्चित् ते दत्तवन्त:। श्रेष्ठी अपि स्वकीयं पञ्चशत- रूप्यकाणां पारितोषिकं वित्ताधि कारिण: ग्रहीतुं गायकम् अकथयत्। अतीव प्रसन्न: भूत्वा गायक: वित्ताधिकारिणम् उपागच्छत्। किन्तु वित्ताधिकारी तस्यै न किम् अपि दत्तवान्। अत: परावृत्य स: गायक: श्रेष्ठिनं तद्विषये न्यवेदयत्।

श्रेष्ठी तं कथितवान् - "गायक महाराज! भवता गान-माधुर्येण अस्मदीय-कर्णेषु आनन्दानुभूति: कारिता। मया अपि पारितोषिक-राशिं श्रावयित्वा भवदीय-कर्णयो: आनन्दानुभूति: कारिता एव। अत: अनेन आदानं प्रदानं च समानं समजायत। न किञ्चित् अपि प्रदानाय अवशिष्यते"। इति।

- शिक्षा-

**धूर्त्तो वाक्छलतोऽवश्यं, सौम्यं वञ्चयते सदा।**
**अतो दूरेऽवतिष्ठेत, तत: सुमतिमान् जन:।**

- विद्या-वैभव-भवनम्
२९-केसर-विहार:
जगतपुरा, जयपुरम्-३०२०१७

# यन्त्रचक्रिका

– डॉ० आशुतोष दयाल माथुरः

''मातः! यन्त्रचक्रिकां (मोटरसाइकिल इति) मे क्रीणातु। सर्वमपि ते विपणिगतं कार्यं झटिति करिष्ये''– इति मुहुर्मुहुर्मातरं विनीतो निवेदयति।

''तात, अखिलो वा शिवेशो वा सर्वे हि मे सखायो यन्त्रचक्रिकाश्चालयन्ति। अहमेकाकी बसयानेन विद्यालयं गच्छन् लज्जे'' – इति पितरं प्रत्यहं साग्रहं स वदति।

कदाचिद् बाल इव विलपति, कदाचिद् भोजनं न खादति, कदाचिद् विद्यालयमेव न गच्छति।

कैशोर्ये वर्तमानस्य तस्य माता सचिन्तं पतिमवदत् – श्रूयताम्। अयं बालश्चक्रिकामतीव वांछति। तस्य मित्राण्यपि यन्त्रचक्रिकाभिर्गच्छन्ति। अस्मिन् वयसि प्रायो दुराग्रहिणो भवन्ति बालाः। अस्य कृते यन्त्रचक्रिकां दातव्या, तथा परस्परं विमृश्य पितरौ यन्त्रचक्रिकां तस्मै क्रीतवन्तौ। भ्राजमानां रक्तवर्णां यन्त्रचक्रिकां प्राप्य सोऽपि प्रफुल्लित इव नवीकृत इव संजातः।

अपरेद्युरेव विनीतः प्रशिक्षु–अनुज्ञां गृहीतवान्। मित्राणां सहयोगेन द्वित्रैरेव दिवसैश्चालयितुमारब्धवान्।

तदा, ''मातः ! अपि विपणितः किमप्यानेतव्यम्'' – इति पुनः पुनः पृच्छति। अथवा, अकारणमपि कस्यचित्सम्बन्धिनो मित्रस्य वा गृहं गच्छति। अथवा, अकस्मादपि यन्त्रचक्रिकां चालयितुं गृहान्निर्गच्छति।

तदा तस्य पिता विनीतमवदत् – वत्स, यातायातनियमानां सततं पालनं करोतु। चतुष्पथेषु रक्तवर्तीं मोल्लंघयतु।'' अधिकमनुशासनमवांछन् स तथा क्रियते – इत्यलीकमवदत्।

चिन्तातुरा माता तमब्रवीत् – ''दुर्ललित! तव भूय आग्रहेण क्रीता यन्त्रचक्रिका। अनर्थकं मा चालय। दिल्ल्यां सर्वत्र मार्गा वाहनसंकुलाः। न चेयं चक्रिका तथा स्थिरा यथा चतुष्चक्राणि वाहनानि भवन्ति।''

''मात:! नाहं क्रोडस्थो बाल:। अहं सावधानं चालयामि'' - इति मातुर्वचनमुपेक्ष्य विनैव शिरस्त्राणं, महता वेगेन, वाहनसंकुलेषु मार्गेषु दक्षिणतो वामं वामतश्च दक्षिणमिति वक्रवक्रं यन्त्रचक्रिकां चालयति।

तस्य मित्राणि सर्वे तथैव तेषां तेषां चक्रिकाश्चालयन्ति स्म तं च प्रोत्साहयन्ति स्म। मार्गेषु चलतां वाहनानां ते मार्गं न ददति स्म। रक्तवर्तीषु सतीषु द्रुतं निर्गच्छन्ति स्म। शिरस्त्राणानि न धारयन्ति स्म। मित्रै: प्रोत्साहितो विनीत: सर्वान् नियमानुल्लंघयति स्म। एकदा तथा कुर्वंश्चारक्षिभिर्गृहीत:।

पुरुषस्तं परुषमपृच्छत् - ''रे ! कुत्र तेऽनुज्ञापत्रम्।'' असौ सभयं प्रशिक्षु-अनुज्ञां दर्शयति।

पुरुषोऽवदत् - ''नेदं साधु। प्रशिक्षुपत्रकमिदम्। ज्येष्ठं विना वाहनचालनं नानुमतं तव। अर्थदण्डो भविष्यति। पंचशतरूप्यकाणि देहि।''

प्रथमं तावदसौ कस्यचिन्मित्रस्य वच: स्मृत्वा पुरुषं भीषयितुं मिथ्या वदति - ''कथं कथम् । मम मातुल: यातायातविभागे वरिष्ठाधिकारी''।

''आरक्षिभिर्गृहीता: सर्वे तथा वदन्ति'' इति स पुरुष उच्चैर्हसति। ''भवतु। तस्य नाम, पदनाम च वदतु। तेन दूरभाषेण सम्पर्कं कृत्वा वार्तां कारयतु।''

तदाकर्ण्य विनीतस्य मुखं शुष्यति, देहश्च स्विद्यते। अवरुद्धकण्ठ: सोऽकथयत् - ''मर्षयतु मर्षयतु । अहमलीकं कथयामि। महोदय, न मत्पार्श्वे पंचशतरूप्यकाणि सन्ति। केवलं पंचाशद्रूप्यकाणि सन्ति।''

पुरुषस्तं सक्रोधं पश्यन्नब्रवीत् - '' पितरं दूरभाषेण समाकारय। नो चेत् स्थानं ते चक्रिकां नेष्याम:।''

''नहि नहि । श्रीमन् । तथा न कार्यम् । तातस्ताडयिष्यति नूनम्। चक्रिकां चालयितुं च न दास्यति'' - इति

भयाक्रान्तो विनीतो बहुविधं तस्यानुनयं कृतवान्। परमसौ पुरुषो न तस्यानुनयैर्द्रवित:।

''चक्रिका स्थानं नीयते चेत्तदापि तातः कोपिष्यति। अधुना कार्यालयस्थं सूचयामि तदापि क्रोत्स्यति। किं करवाणि। भवतु! मातरं सूचयामि - इति विचिन्त्य दूरभाषेण मातरं सर्वं व्यज्ञापयत् । कुपिता हि तस्य माता भूयोऽपि तं भर्त्सयित्वा तस्य जनकं समसूचयत्। उभौ च कृतदोषस्यापि पुत्रस्य रक्षणाय त्वरितं तत्र समागतौ। तौ विलोक्य विनीतः साक्रन्दं रोदितुमारभत। परं न माता न च तातस्तस्य मुखमपश्यत्। न सान्त्वनावचनमवदत्। न तं समाश्वासयत्।

ताडनादपि भर्त्सनादपि क्रूरतरः स दण्ड आसीत्। अर्थदण्डं प्रदाय पुरुषाय तस्य पिता, पुनर्विनीतमुपेक्ष्य, स्वयं यन्त्रचक्रिकां प्रचाल्य, सह मात्र गृहं प्रतिगन्तुं प्रवृत्तः।

''क्षम्यताम्, क्षम्यताम् - इत्याक्रुश्यन्नसौ यन्त्रचक्रिकामन्वधावत्।

**- संस्कृत विभागाध्यक्षः**
**सेन्ट स्टीफन्स महाविद्यालयः**

# पक्षिणः रक्षणीयाः अस्माभिः सदा

- सरोज गुलाटी

(परिवारस्य सर्वे जनाः गृहस्य बहिः उपविशन्ति)

**पिता** – अमिते! पश्यतु तत्र।

**अमितः** – कुत्र कुत्र ?

**पिता** – वृक्षस्य तस्यां शाखायाम् उपरि।

**अमितः** – तत्र एकः शुकः कथं स्वचञ्च्वा स्वशावकं भोजनं खादयति।

**अमिता** –हे पितः! मया तु न दृश्यते।

**पिता** – कोणे स्थित्वा भवती पश्यतु।

**माता** – सन्ततिं प्रति स्नेहः तु सर्वप्राणिषु भवति।

**पिता** – सत्यं वदति भवती।

**अमिता** – मया दृष्टम्।

**अमितः** – मया अपि।

**अमितः** – अहं प्रतिदिनं खगानां भोजनाय अन्नानि जलम् वृक्षस्य समीपं स्थापयामि।

**अमिता** – अहम् अपि।

**अमिता** – मम तु अध्यापिकया अपि एतत् एव अद्य एव पाठितं यत् पशुपक्षिभ्यः भोजनं तु प्रतिदिनं दातव्यम् एव।

**पिता** – सत्यं कथितं तव अध्यापिकया। पशुपक्षिणः तु सदा रक्षणीयाः एव।

**माता** – सत्यं शिक्षितं तव अध्यापिकया।

**पिता** – अध्यापिकायाः कथनं तु युष्माभिः परिपालनीयम् एव ।

**अमितः** - आम् ! अहं प्रतिदिनं एतेभ्यः अन्नं दास्यामि।

**अमिता**- अहं तु जलं दास्यामि।

**माता** - शोभनः विचारः।

**पिता** - आम्।

**माता** - पक्षिणः सततं रक्षेत् सस्नेहं परिपालयेत्
वर्णैर्गीतैः क्रियाभिस्ते रंजयन्ति मनःसदा ।

**सर्वे** - (मिलित्वा कथयन्ति )

पक्षिणः रक्षणीयाः अस्माभिः सदा,

**- कुलाची हंसराज मॉडल विद्यालयः**
**नवदेहली- 52**

## अन्तर्राष्ट्रीय मूल्यांकित एवं साहित्यिक त्रैमासिक तथा मासिक बाल पत्रिका

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति व सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुतियाँ

**''संस्कृत मंजरी''**

(आई.एस.एस.एन.-2278- 8360)

**''संस्कृत-चन्द्रिका''**

(आई.एस.एस.एन.-2347-1565)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित पत्रिकाएँ जो सहज मानवीय संवेदनाओं, शोध निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल, पठनीय एवं संग्रहणीय हैं ।

**संस्कृत मंजरी मूल्य - एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. १००/- मात्र**

**संस्कृत चन्द्रिका मूल्य - एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका ''संस्कृत मंजरी'' एवं ''संस्कृत-चन्द्रिका'' के स्थायी अध्येता बनें ।

आज ही अपना वार्षिक सदस्यता शुल्क नगद, मनिआर्डर/ मल्टी सिटी चैक अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट द्वारा ही सचिव, दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें ।

पत्र व्यवहार का पता--

**प्लॉट सं., झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं. -०११-२३६३५५१२, २३६८१८३५**

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
दूरभाष सं.-०११-२३६३५५९२, २३६८१८३५
सचिव/सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

# 'संस्कृत-मञ्जरी'

## 'त्रैमासिकी'

अकादमी द्वारा नियमित रूप से प्रकाशित की जा रही संस्कृत मञ्जरी नामक त्रैमासिक पत्रिका अपने शोध-लेखों के लिए अन्ताराष्ट्रिय मानक रूप से प्रतिष्ठित है। यह पत्रिका शोध-निबन्धों के माध्यम से सहज मानवीय संवेदनाओं तथा उदात्त जीवन मूल्यों का अनूठा संगम है साथ ही प्रत्येक वर्ग एवं समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय सामग्री से परिपूर्ण है। आप सभी सुधी पाठकों से निवेदन है कि आप संस्कृत की इस त्रैमासिक शोध-पत्रिका के लिए संस्कृत, हिन्दी अथवा अंग्रेजी में लेख प्रेषित करें। जिसके लिए अकादमी द्वारा निर्धारित नीति के अनुसार ३ से ७ पृष्ठ के लेखों के लिए रु. ५००/- तथा ८ या उससे अधिक पृष्ठों के लेखों के लिए रु. १०००/- मानदेय स्वरूप प्रदान किए जाते हैं।

शोध-लेख वाक्मैन चाणक्य फॉण्ट ६०१ या ६०५ में अथवा कृतिदेव ०१० फॉण्ट साइज १६ में टाइप कर (साफ्ट कॉपी) ई-मेल से अथवा (हार्ड कॉपी) अकादमी कार्यालय के पते पर डाक द्वारा भेज सकते हैं।

ह०/-

(डॉ० जीतराम भट्ट)
सचिव

RNI No.
DELSAN/2013/50379



प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वाामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।